# नायक्स टयुटोरिअल्स



Way to Excellence

नमुना प्रश्नपत्रिका क्र – १ गुण :- ८०

इयत्ता :- १० वी संस्कृत संपुर्णम् वेळ :- ३ तास

## विभाग १: सुगमसंस्कृतम् ।

प्रश्न .१ .अ) चित्रं दृष्ट्वा नामानि लिखत। (५तः४) ४

१)  २)  ३) 

४)  ५) 

आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (३तः२) २

(१) पञ्चाशत् (२) एकाशीतिः (३) ८६

इ) समय – स्तम्भमेलनं कुरुत। २

| अ | आ |
|---|---|
| १) पञ्चाधिक – नववादनम् | २ .४५ |
| २) पादोन – त्रिवादनम् | ४ .२० |
| ३) सार्ध – द्वादशवादानम् | ९ .०५ |
| ४) विंशत्यधिक – चतुर्वादनम् | १२ .३० |

प्रश्न .२ .अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः करूत।

अथ प्राप्तः सुदासस्तदुद्यानं, यत्र **भगवतः** सुगतस्य निवासः । तत्र वटवृक्षस्याधस्तादेकस्मिन्नश्मखण्डे समुपविष्ट आसीत्स **महात्मा** । अनल्पेन **धाम्ना** राजते स्म तस्य **भगवतो** वदनम् । तदालोकयतः सुदासस्य चित्ते भक्तिरसार्णव उदतिष्ठत् । स हस्तस्थं नीरजं **भगवतः** सुगतस्य चरणयोरर्घ्यं कृत्वा 'नमो **भगवते**' इति वदन् सविनयं प्राणमत् ।

तं प्रसादवर्षिभ्यां लोचनाभ्यां निरूपयन् स्मयमानमुखपद्मो **भगवान्** अभाषत, ''वत्स, किमिच्छसि?'' इति। एवम् उक्तवति सुगते निरिच्छः सुदासः प्रत्यवदत्, ''**भगवन्** किमन्यत्? केवलं **भगवतः** चरणकमलस्पर्शेन **आत्मा** मे कृतार्थतां लभताम्'' इति ।

एवंवादिनं सुदासं 'तथास्तु' इत्यब्रवीद् **भगवान्** सुगतः । अहो प्रभावः सुगतस्य, यत्तस्य दर्शनमात्रेणैव कमलार्थं बहुमूल्यमपेक्षमाणः सुदासस्तद्विस्मृत्य सुगतचरणाभ्यां तत्कमलं समर्पितवान् ।

एष सुगतः एव ननु **भगवान्** गौतमबुद्धः ।

१) अवबोधनम् (४ तः३) ३

अ) कः कं वदति ? " वत्स,किमिच्छसि?"

आ) पूर्णवाक्येन उत्तरं लिखत।

महात्मा कुत्र उपविष्टः आसीत् ?

इ) एषः गद्यान्शः कस्मात् पाठात् उद्धृतः?

ई) सत्यं वा असत्यं लिखत। सुगतः, देवालये वृक्षस्यअधः उपविष्टः ।


२) शब्दज्ञानम्। (३तः२) २

अ) सन्धिविग्रहं कुरूत। इत्यब्रवीत् = .......+......

आ) गद्यांशात् धातुसाधित – अव्यये चिनुत लिखत च।

त्वान्त अव्ययम् = ........ ल्यबन्त अव्ययम् = .......

इ) स्थानाधारेण शब्दपेटिकां पूरयत। २



(वटवृक्षः,नगरम् ,अश्मखण्ड, उद्यानम् )

प्रश्न.२.आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः करूत।

महोदयः - महाविद्यालये संस्कृताध्ययनं केवलं कलाशाखायाः छात्राः कुर्वन्ति इत्यासीत् मे मतिः ।

समीरः - तिष्ठतु तावत् । तर्हि अवश्यं मेलयामि मे मित्राणि । एते सर्वेऽपि परिषदि सहभागिनः ।

प्रसादः - (अग्रे आगत्य) नमस्ते । अहं रसायनशास्त्रस्य छात्रः । प्राचीनभारतीयरसायनशास्त्रम् इति मम संशोधनक्षेत्रम् । तद्विषयकाः ग्रन्थाः संस्कृतभाषया लिखिताः । शालायां यद् संस्कृताध्ययनं कृतं तस्य उपयुक्तताम् अहम् अधुना अवगच्छामि ।

लीना - अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफ्टवेअर-क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि । संस्कृतस्य ज्ञानम् आधुनिकभारतीय-भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इति मे अनुभवः ।

तनुजा - पार्श्वनिवेदनम् इति मे व्यवसायः । संस्कृतश्लोकादीनां पठनेन शब्दोच्चारणस्य उत्तमः अभ्यासः भवति। तेन अभिनये निवेदने च प्रभावः वर्धते । साम्प्रतं कलाक्षेत्रे कार्यरताः अस्मासु केचन भरतमुनेः नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति ।

समीरः - भोः, भारतीयविद्यायाः नाम भारतीयतत्त्वज्ञान-योगशास्त्र-इतिहास- स्थापत्यादिशास्त्राणाम् अध्ययनाय विदेशेष्वपि नैके जनाः उत्सुकाः । तदर्थं काश्चन दूरचित्रवाहिन्यः अपि सन्ति । तत्र संस्कृततज्ज्ञानाम् आवश्यकता वर्तते । मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः ।

१) अवबोधनम् (४ तः३) ३

अ) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

१) अस्माभिः संस्कृतस्य अध्ययनं . . . . . . . कृतम्। (शालां/शालायाम्)

२) एते सर्वेऽपि. . . . . . . . . सहभागिनाः। (परिषदि/कार्यशालायम्)

आ) कःकं वदति।

"अवश्यं मेलयामि मे मित्राणि।"

इ) पूर्णवाक्येन उत्तरं लिखत।

संस्कृतश्लोकदीनां पठनेन कः लाभ ?

ई) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं वा इति लिखत।

भरतमुनिना नाटयशास्त्रविषयकः ग्रन्थः रचितः ।

२) शब्दज्ञानम्। (३तः२) २

अ) प्रश्ननिर्माणं कुरूत।

पार्श्वनिवेदेनम् इति <u>तनुजायाः</u> व्यवसायः ।


आ) सन्धिविग्रहं कुरूत।

विदेशष्वपि = . . . . . .+ . . . . . .

इ) लकारं लिखत।

इति आसीत् मे मतिः ।

३) जालरेखाचित्रं पूरयत। २




प्रश्न .२ .इ) माध्यमभाषया सरलार्थं लिखत। (२तः१) ४

१) **वसन्तसेना –** रदनिके! स्वागतं ते । कस्य पुनरयं दारक:? अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

**रदनिका** – एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम ।

**वसन्तसेना –** (बाहू प्रसार्य) एहि मे पुत्रक! अनुकृतमनेन पितु: रूपम् । अथ किं निमित्तमेष रोदिति?

२) वैखानस: – (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्य:, न हन्तव्य: । आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्त: – प्रतिसंहृत एष: सायक: । (यथोक्तं करोति)

वैखानस: – राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपते: अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेय: सत्कार: ।

ई) माध्यमभाषया उत्तरं लिखत। (२तः१) २

१) शक्रस्य कपटं विशदी कुरूत।

२) विश्वामित्रः नद्यौ किं प्रार्थयत् ?

प्रश्न .३ .अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत।

१) पद्यांशं पठित्वा निर्दिष्टे कृती कुरूत। (३तः२) २

(१) **रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्**
**अम्भोदा बहवोऽपि सन्ति गगने सर्वेऽपि नैतादृशाः ।**
**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा**
**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।२।।**

(२) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यश:सुखकरी विद्या गुरूणां गुरु:।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं **विद्याविहीनः पशुः**।।१।।

(३) घंट भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम्।
येन केन प्रकारेण प्रसिध्दः पुरूषो भवेत्॥

क) पूर्णवाक्येन उत्तरं लिखत।
कविः चातकं किम् उपदिशति ?

ख) विशेषण - विशेष्ययोः मेलनं कुरूत।


| अ | आ |
|---|---|
| १) दीनं<br>२) परं | प्रसिद्धः<br>वचः<br>दैवतम् |

ग) उत्तरपदं लिखत।

१) वृष्टिभिरार्द्रयन्ति = वृष्टिभिः + . . . . . . . . ।

२) कुर्याद्रासभरोहणम् = कुर्यात् + . . . . . . . . ।

२) जालरेखाचित्रं पूरयत। २




आ) माध्यमभाषया उत्तरं लिखत। (२तः१) २

१) कदा मदः व्यपगच्छति ?

२) 'येन केन प्रकारेण' इति उक्ति स्पष्टिकुरूत।

इ) पद्ये शुध्दे पूर्णे च लिखत। (क,ख तः १,/ग,घ तः १)

१) (क) प्रथमवयसि . . . . . . . . . विस्मरन्ति ॥ अथवा (ख) रथस्यैकं . . . . . . . . . नोपकरणे ॥

२) (ग) अल्पानामपि . . . . . . . . मत्तदन्तिनः ॥ अथवा (घ) यादृशं . . . . . . . फलम् ॥

ई) अन्वयं लिखत। (३तः२) २

तत्र . . . . . . न अस्ति पत्र . . . . . अपि श्लाघ्यः भवति। निरस्तपादपे देशे एरण्डः अपि . . . . ।

उ) सरलार्थ लिखत। (३तः२) ४

१) यथैव सकला नद्यः प्रविशन्ति महोदधिम्।
तथा मानवताधर्म सर्वे धर्माः समाश्रिताः ॥

२) आत्मौपम्यं समाश्रित्य मानवो मानवैः सह।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ॥

३) वृथाभ्रमणकुक्रीडापरपीडापभाषणैः ।
खालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ॥

## चतुर्थी विभाग

प्रश्न.४.अ) धातूनाम् /अव्ययानाम् उपयोगं कृत्वाः वाक्यनिर्माण कुरूत (६तः४)४

१) कुप् (४ पःप) २) अलम् ३)स्निह् (४ प.) ४) स्पृह (१० उप)

५) परितः ६) वि + रम् (१प.प)

अथवा

संस्कृतानुवादं कुरूत। (६तः४) ४


| | |
|---|---|
| 1) A cat likes milk. | १) मांजरीला दूध आवडत. |
| 2) Raw mangoes are green in colour. | २) कच्च्या आंब्याचा रंग हा हिरवा असतो. |
| 3) I saw a tiger in the forest. | ३) मी जंगला मध्ये वाघ बघितला. |
| 4) Lest your success increase. | ४) आपले यश वाढू दे. |
| 5) The moon is seen at night in the sky. | ५) रात्री आकाशात चंद्र दिसतो. |
| 6) Please give me water. | ६) कृपया मला पाणी दया. |

आ) ५/७ वाक्यात्मकं निबन्धं लिखत।(३ तः१) ५

१) मम प्रिय उत्सवः। २) मम प्रियः नेता। ३) मम प्रिय भाषा।

अथवा

मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यत्मकं चित्रवर्णनं कुरूत ।




मञ्जूषा - धारयन्ति, वाहयति, शोभते, गर्जति, वर्षति, उत्प्लवते, नयति, वहति, रटति

## पञ्चमः विभागः भाषाभ्यास ः |

प्रश्न.५) अ) तालिका पूर्ति कुरूत | ८

(१) नामतालिका पूरयत | (६ तः ४) २

| ए.व | द्वि.व | ब.व | विभक्ति |
|---|---|---|---|
| नाम | ....... | ....... | प्रथमा |
| ....... | ....... | साधुभिः | तृतीया |
| ....... | रामयोः | ....... | सप्तमी |

(२) सर्वनाम तालिका पूरयत (६ तः ४) २

| ए.व | द्वि.व | ब.व | विभक्ति |
|---|---|---|---|
| ....... | ....... | केषाम् | षष्ठी |
| अस्यै | ....... | ....... | चतुर्थी |
| माम् – मा | ....... | ....... | द्वितीया |

(३) क्रियापदतालिका पूरयत (६ तः ४) २

| एकवचनम् | ए.व | द्वि.व | ब.व | पुरूष | लकार |
|---|---|---|---|---|---|
| नृत् (४पप) | ....... | ....... | नृत्यन्ति | प्र.पु | लट् |
| रम् (१ आप) | ....... | रमेथाः | ....... | म.पु | लिङ् |
| पठ् (१पप) | ....... | ....... | अपठाम | उ.पु | लङ् |

(४) धातुसाधित विशेषण तालिका (६ तः ४) २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ /शानच |
|---|---|---|---|---|
| ज्ञा (९आप) | ....... | ज्ञातवान् | ज्ञेयः | ....... |
| पत् (१ पप) | पतितः | ....... | ....... | पतन् |
| खाद् (१ पप) | ....... | खादितवान् | खाद्यः | ....... |

आ) निर्दिष्टाः कृतीः कुरूत | (४ तः ३) ९

१) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्ति कुरूत। (५तः३) ३

क) दिनस्य .......(२) अहं भोजनं करोमि। (आवृत्तिवाचकम्)

ख) भोजने ........ (६) रसेषु मधुरः रसः मम प्रियः। (संख्यावाचकम्)

ग) आर्यभट्टः इति भारतवर्षेण प्रेषितः ........ (१) उपग्रहः। (क्रमवाचकम्)

घ) ........(२) भवने योगेशः निवसति। (क्रमवाचकम्)

ड) .........(३) महिलाः जलमाहर्तु गच्छन्ति। (सङ्ख्यावाचकम्)

२) समासानां तालिकापूर्ति कुरूत |(५ तः ३) ३

| समास | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| कविपण्डिताः | ......... | इतरेतरद्वन्द्वः |
| ......... | लोकानां प्रियः | ......... |
| सूक्ष्मकणाः | ......... | कर्मधारयः |
| मदान्धः | मदेन अन्धः | ......... |

३) समानार्थकशब्दान् /विरूध्दार्थकशब्दान् लिखत | (५ तः ३) ३

१. उत्साहः × .......... | २. अधमः = .......... |

३. बहूनि × .......... | ४. पादपः = .......... |

५. दृढः × ......... |

४) सूचनानुसारं कृतीः कुरूत | (५ तः ३) ३

१) त्वं पादान्स्तब्धीकृत्य तिष्ठ | ('त्वं' स्थाने 'भवान्' योजयत)

२) वयं महामागस्य नामधेयं जानीमः | (वाच्यपरिर्वनं कुरूत)

३) जनाः न सन्तुष्टाः | (वाक्यं एकवचने लिखत)

४) अहं विस्तरेण पठितुम् इच्छामि | (वाक्यं लङ्लकारे परिवर्तयत)

५) मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् | (पुर्वकालवाचकं निष्कासयत)

## षष्ठ : विभाग : = अपठितम्। (5)

प्रश्न.५)अ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत। (5 त: 3) ४

**नर्मदा तीरे विशाल: वृक्ष: अस्ति। तस्य कोटरे विविधा: खगा: सुखेन निवसन्ति। एकदा गगने मेघा: आगच्छन्ति, गर्जन्ति, वर्षन्ति च। पर्जन्यपीडिता: वानरा: तस्य वृक्षस्य तलम् आश्रयार्थम् आगच्छन्ति। खगा: वानरान् पश्यन्ति। एक: खग: वदति - वानरा:उष्णकाले पर्जन्यनिवारणार्थं गृहं किमर्थं न कुर्वन्ति ? ते केवलं क्रीडन्ति, परस्परं कलहं कुर्वन्ति, कालस्य अपव्ययं कुर्वन्ति च।**

**आलस्यं दु:खस्य कारणम्। उद्योगेन सर्वे सुखं लभन्ते इति।**

१) **पूर्णवाक्येन उत्तरं लिखित। - कोटरे के निवसन्ति ?**

२) प्रातिपदिकं लिखत। - गगने = __________, वानरान् = __________

३) माध्यमभाषया सरलार्थं लिखत।

खगा: वानरान् पश्यन्ति।

४) कारकपरिचयं कुरुत ।

एकः <u>खगः</u> वदति ।

५) वाक्यं पुनर्लिखित्वा सत्यं / असत्यं लिखत ।

आलस्येन सर्वे सुखं लभन्ते ।

आ) पद्यांश पठित्वा कृतीः कुरुत । (a अथवा b)

विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषुच ।


व्याधितस्य औषधं मित्रं धर्मो मित्रं मृतस्य च ।।

१) (i) पूर्णवाक्येन उत्तरं लिखत । कः मृतस्य मित्रम् ?

(ii) पद्यान्शात् समार्थकशब्दं चिनुत लिखत च । ज्ञानम् = ________ ।

अथवा

इ) जालरेखाचित्रं पूरयत ।




****________****